https://www.amitrakshar.co.in/journal
: www.amitrakshar.co.in
Volume – 3 | Issue – IV | July- August 2026 | ISSN: 3049-0278 (Online)
Amitrakshar International Journal
of Interdisciplinary and Transdisciplinary Research (AIJITR)
(A Social Science, Science and Indian Knowledge Systems Perspective)
Open-Access, Peer-Reviewed, Refereed, Bi-Monthly, International E-Journal

# वैदिकसूक्तेषु मानवतावादस्यावधारणा

**अरुणिमा घोषः**[1]

**शोधसारः :-**
*मानवः इतरजीवेभ्यः तस्य धीशक्त्या जीवश्रेष्ठ इति पदवीं भजते। अतः मानवैः अवश्यमेव मानवोचितानां मूल्यानां संरक्षणं कर्तव्यम्। एतेषां सम्यग् अनुकरणेन मानवमनसि सर्वकल्याणभावना जायते। वेदः भारतीयसभ्यतायाः, संस्कृतेः, धर्मस्य च उत्सः भवति। वेदः खलु मन्त्रब्राह्मणात्मकः। वेदज्ञानहीनजनः भारतात्मनः मर्मवाणीम् उपलब्धुं न शक्यते। अस्मिन् वेदे श्रद्धा- संज्ञान- शिवसङ्कल्प- सांमनसादीनि विशेषवैचित्रसम्पन्नानि कतिपयानि सूक्तानि सन्ति। येषु दया दान-धैर्य-मैत्री-क्षमा-सेवादीनां मानवतासूचकगुणानामुल्लेखः अस्ति। एतेषां गुणानां यथाशास्त्रं पालनेन मनुष्याः मानविकपदवाच्याः भवन्ति। वर्तमानसमाजे एतेषां मानवतावोधकगुणानामुपयोगिता प्रस्तुते शोधप्रबन्धे अस्मिन् उपस्थाप्यते।*
**कूटशब्दाः :-** *सत्कर्म, मानवतावादः, अहिंसा, समत्वभावः, सुमतिभावः*

ISSN: 3049-0278 (Online) DOI (Crossref) Prefix: 10.63431
AIJITR- Volume-3, Issue-IV, July-August 2026

Copyright © 2026 by author (s) and (AIJITR). This is an Open Access article distributed under the terms of the Creative Commons Attribution License (CC BY 4.0) (https://creativecommons.org/licenses/by/4.0)

उपोद्घातः :- संस्कृतसाहित्ये वेदानां स्थानं सर्वोपरि वर्तते। अखिलभूमण्डलेऽस्मिन् समुपलब्धेषु विविधभाषागतप्राचीनग्रन्थेषु वेदः सर्वेभ्यः प्राचीनतम इति सर्वैरेव अङ्गीक्रियते। वेदो धर्मनिरूपणे स्वतन्त्रभावेन प्रमाणम्। उक्तञ्च भगवता मनुना – "वेदोऽखिलधर्ममूलम्" इति। सायणाचार्येण भणितं यत् "अपौरुषेयवाक्यं वेदः", "इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकं साधनं यो वेदयति स वेदः"। वेदपदेन तु – संहिता, ब्राह्मणम्, आरण्यकम्, उपनिषद् चेति चतुर्णां ग्रन्थानां वोधो भवति। एतेषु चतुर्षु विभागेषु छन्दोबद्धः मन्त्ररूपो ब्राह्मणभागो गद्यात्मको यागादिवर्णनपरकः, आरण्यकभागो छन्दोवद्धमन्त्रयुक्तो गाथारूपो वा विद्यते। उपनिषद्भागे तत्तत्संहितागतब्रह्मज्ञानादिविषयाणां वर्णनरूपेण संकलनम्। वेदशास्त्रम् अस्माकं धर्म-संस्कृति-आचार-व्यवहारादीनां दर्पणतुल्यमस्ति। न केवलं भारतवर्षस्य अपि तु समग्रविश्वस्य सर्वमनीषिणां कृते ज्ञानस्रोतोऽस्ति वेदः। मातृभूमेः सेवा करणीया इति ऋग्वेदे प्रथमतः उद्घोषितः। वेदेऽस्मिन् राष्ट्रहितचिन्तनं विश्वबन्धुत्वभावना स्वकर्तव्यपालनं सर्वजीवकल्याणभावना चेत्यादयः विस्तृतरूपेण चित्रिताः। तस्मात् वेदशास्त्रमिदमस्ति जीबनदर्शनम्।

<u>वैदिकसूक्तेषु मानवतावादः</u> :- प्रत्येकजनः समाजस्याङ्गो विद्यते। अतः समाजस्य ऐक्यभावं मैत्रीभावञ्च रक्षणाय बैदिकर्षयः तत्पराः दृश्यन्ते। वेदे ये वैचित्र्यपूर्णेषु सूक्तेषु मानवीयमूल्यानां चर्चाः संलक्ष्यन्ते, निम्ने ताः आलोचिताः-

❖ सुचिन्तनम् : सर्वेषां कृते इयं पृथिवी। अत्र वासस्थानसय खाद्यस्य च समानाधिकारो भवेत्। फलप्राप्तिरपि समाना भवेत्। किन्तु सर्वत्र वैषम्यं परिदृश्यते न तु साम्यम्। सौमनसा चिन्तया च इदं दूरीभूतं सम्भवेत्, वेदे प्रत्येकस्य मानवस्य कर्तव्यविषये प्रतिध्वणितं यत् अशुभकथनं न श्रोतव्यं, अशुभदृश्यं न द्रष्टव्यम् इति च। सदा सत् श्रोतव्यं सत् द्रष्टव्यं च—

"भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्योमाक्षभिर्यजत्राः"(१)

शुभचिन्तनमेव हृदयस्पर्शरूपमतिशयप्रियस्वरूपं भवति—"क्रतुं न भद्रं हृदि स्पृशम्"।(२) अनेन सुचिन्तनस्योद्बोधनेन मानवतावादस्य परिचयः प्रकाशितः भवति।

❖ सत्यभाषणम् : नैतिकोन्नतिसाधनाय अपर एक आवश्यिकगुणः सत्यभाषणम्। "न हि सत्यात् परो धर्म" – सत्यापेक्षया श्रेष्ठधर्मो नास्ति। सत्यसङ्कल्पयुक्तो जनः न केवलं स्वात्मानं पवित्रं करोति, अपि च सर्वान् पुनाति। जनः यदि सत्यं धृत्वा ह्यग्रे गच्छति तर्हि अस्य जीवनमपि शुद्धं पूतं च भविष्यतीति ऋक्मतम्—

'ऋतेन सत्यमृतसाप आयन् शुचिजन्मानः शुचयः पावकाः'(३) इति

संसारेऽस्मिन् सत्यासत्यमुभो विद्यते। सत्यं श्रद्धायोग्यं तथा अनृतमश्रद्धायोग्यमिति प्रोक्तम्-

'दृष्टा रूपे व्याकरोत् सत्यानृते प्रजापतिः।
अश्रद्धाम् अनृतेऽदधात् श्रद्धां सत्ये प्रजापतिः॥' (४)

सत्यभावनया दुष्कर्माणि विनश्यन्ते। सत्यं सत्कर्मवोधकं भवति मधुरत्वञ्च प्रयच्छति इति वेदवाणी— 'ऋतस्य जिह्वा पवते मधु प्रियम्।' सत्यं हि अनेकसुखानां स्रोतस्वरूपमस्ति। मानवतावादस्य इयं वाणी मानवचरित्रनिर्माणाय अत्यन्तम् आवश्यकम्।

❖ मधुरवचनम् : सदा मधुरवचनं प्रशस्यते वेदे। मधुरवचनेन सर्वमपि जेतुं शक्यते। मधुरवाचा परस्परं प्रीतिः प्रवर्द्धते जनचित्तञ्च आकृष्यते इति नीतिशास्त्रेऽपि निर्दिश्यते—

'प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता॥'

मधुरवाणी वक्तारं श्रोतारञ्च आह्लादयति। तस्मात् वैदिकसाहित्ये मधुरवचनस्य महत्वम् आधिक्येन व्याख्यातम्। ऋक्संहितायां वर्णितम् यत् यो मधुरभाषी सत्यवादी चास्ति, तस्य कृते वायु-नदी-वनस्पतयः-सर्वेऽपि मधुरत्व प्रदातारः भवन्तीति—

'मधु वाता ऋतायते मधुक्षरन्ति सिन्धवः माध्वीनः सन्त्वोषधी' (५) इति।

---

*1.* **सहकारी अध्यापिका, नन्दलालः घोषः बि टि कलेज्, दूरवाणी संख्या- ९८३६९८७५७५**

*DOI Link (Crossref) Prefix: https://doi.org/10.63431/AIJITR/3.IV.2026.8-10*
*AIJITR, Volume 3, Issue –IV, July - August, 2026, PP.8-10*
*Received on 11th July, 2026 & Accepted on 21st July, 2026,*
*Published: 1st August, 2026.*

*The statement "Copyright © by Author" (The author retains the copyright to the published article.)*

https://www.amitrakshar.co.in/journal : www.amitrakshar.co.in
Volume – 3 | Issue – IV | July- August 2026 | ISSN: 3049-0278 (Online)
Amitrakshar International Journal
of Interdisciplinary and Transdisciplinary Research (AIJITR)
(A Social Science, Science and Indian Knowledge Systems Perspective)
Open-Access, Peer-Reviewed, Refereed, Bi-Monthly, International E-Journal

❖ श्रद्धाप्रदर्शनम् : सुष्ठुरूपेण कार्यसम्पादनाय श्रद्धायाः आवश्यकता विद्यते। वस्तुत श्रद्धया सम्पादितं कर्म अभीष्टफलदायकं तथा श्रद्धाविहीनं कर्म अनिष्टहेतुभूतं भवति। ऋग्वेदीये श्रद्धासूक्ते ऋषिकविना भणितं यत् श्रद्धाज्ञानाग्नेः समिन्धनस्वरूपा। अतो अस्याः श्रद्धायाः उपासना न केवलं मनुष्यैः अपि तु देवैः स्वीयाभिष्टसम्पादनार्थं क्रियते स्म। श्रद्धया एव धनप्राप्तिर्भवति इति ऋग्वचनम्—

'श्रद्धया विन्दते वसु' (६)

अत्र वसुपदेन अज्ञानविनाशपूर्वकमरत्व प्राप्तिरेव वोध्यते। अतो मानवतायाः प्रधानं साधनं 'श्रद्धा' इति उपदिशति वेदः।

❖ अहिंसा : लोकहिताय अहिंसावलम्वनम् परमावश्यकं भवति। अधुना सर्वत्र असहिष्णुता, स्वार्थपरता, विद्वेषः, हिंसाभावम् अपसृत्य परिशुद्धचित्तेन स्वस्थ्यसमाजनिर्माणं सम्भवति। अतः वैदिकसाहित्ये अहिंसा सर्वोच्चस्थानं लभते। ऋग्वेदे सुन्दरवर्णनमिदं दृश्यते यत् वृद्धो भवतु बालको वा, तपस्वती वीरो भवतु न कमपि हन्तव्यम्—

मा नो माहन्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः॥(७)

साधकानां स्तुतिविषयके श्लोकेऽस्मिन् अहिंसायाः वीजं दृश्यते। न केवलं मानवतानामुपरि, अपि तु गवाश्वादिपशूनामुपरि अपि न कदापि कष्टं प्रदातव्यम् इति प्रार्थितम्—

'मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः'(८) इति।

❖ विभेददूरीकरणम् : वेदेषु सर्वेषामेकत्रावस्थानम् ऐकमत्यञ्च समुद्घोषितम्। ऋग्वेदस्य मन्त्रचतुष्टयसम्पन्ने संज्ञानसूक्ते विश्वमानवानां कृते उदाररूपामेकां मिलनभूमिं सृजनार्थं सर्वेषामाह्वानं क्रियते। संज्ञानपदस्यार्थः सम्यक् ज्ञानम्। सूक्तेनानेन ऋषिः संवननः मानवान् ऐक्यमन्त्रेण सञ्जीवितं कर्तुमिच्छति। अधुना मानवेषु विविधविषयमाश्रित्य अनन्तः विरोधः वर्तते। विभेदोऽयं मानवजातेः विनाशमार्गं प्रशस्तं करोति। एतदर्थं सः वदति –

संगच्छध्वं संवदध्वं सं वो मानांसि जानाताम्।
देवा भागम् यथा पूर्व संजनाना उपासते।(९)

मानवतावादस्य गीतमिदं न केवलं वैदिककाले परन्तु विभेददीर्नस्य भोगसर्वस्वस्वरूपस्याधुनिकसमाजस्यापि मर्मवाणीस्वरूपमेव।

❖ समताविधानम् : समाजे शान्तिस्थापनार्थं गृहे शान्तिसाम्ययोः विधानमावश्यकम्। शान्तिपूर्णगृहस्य रमणीयः एको दृष्टान्तः अथर्ववेदे ऋषिकविना प्रदर्शितः। ऋषिवर्णिते तस्मिन् गृहे पुत्रः जननीजनकयोरनुगामी तथानुकूलकर्मा माता सन्तानान् प्रति समानमनस्का जाया मधुरवचनसम्पन्ना च। किञ्च भ्राता भ्रातरं स्वसारञ्च प्रति पुनः स्वसा भ्रातरं स्वसारञ्च प्रति विद्वेषभावं न पोषयति—

अनुव्रतः पितुः पुत्रो माता भवतु संमनाः।
जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्॥
मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा।
सम्यञ्च सव्रता भूत्वा वाचं वदत भद्रया॥(१०)

इत्थं तदा समाजस्य प्रत्येकगृहेषु सर्वे मानवाः परस्परं शोभनवाक्यप्रदानेन निवसन्ति। अनेन वर्णनैव मानवतावादस्य परिचयः प्रकाशितः भवति।

❖ उदारताभावः : सम्पूर्णेषु वेदेषु दया-करुणा-स्नेहादिमानवीयगुणादीनाम् उपदेशैः परस्परं उदारताभावः प्रकाशितः भवति। अयं भावः मानवं सुमानवरूपेण प्रतिष्ठापयितुं सिद्धास्ति। अस्माकं मनः कुमत्यां न कदापि निवेशयत् इति कामना कृता ऋग्वेदे—

"देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो निवर्ताम्"(११)

ऋग्वेदस्य एकस्मिन् मन्त्रे निगदितं यदस्माकं मतिः परकल्याणात्मिका स्यात्। अत्र लोककल्याणाय 'विश्वजन्याम्' इतस्य प्रयोगो दृश्यते। इह न केवलं स्वस्यैव सर्वेषां हितसाधनार्थं सुबुद्धिं देहीति प्रार्थितम्। अनेन मानवतावादस्य परिचयः प्रकाशित भवति।

❖ सन्मार्गप्रदर्शनम् : सदा सन्मार्गस्यान्वेषणं कर्तव्यमिति विषयः वेदे वहुल वहुधा परिलक्ष्यते। सन्मार्गस्याभिप्रायो भवति- सुमार्गः जीवनोद्धारमार्गश्च। सन्मार्गेणैव ज्ञानं वैभवं श्रीवृद्धिश्च जायते। ऋग्वेदीये अक्षसूक्ते सन्मार्गस्य पन्थाः सुचारुरूपेण प्रदर्शितः। तत्र उपन्यस्तं यत्, अक्षक्रीडा अतीव क्लेशदायका भवति –

"अक्षैर्मा दिव्यः कृषिमित् कृषस्व।
वित्ते रमस्व बहु मन्यमानः॥(१२)

यद्यपि अक्षक्रीडा इव गर्हितकर्मणा अर्थलाभः भवति तथापि एतत् कर्म निन्दनीयम्। श्रमस्य विकल्पं नास्ति। कृषिकार्येण ये अर्थाः धनानि च आगच्छन्ति ते खलु सन्मानवर्धकाः भवन्ति। अनेन सर्वान् मानवान् सन्मार्गेणैव जीवनयापनमुपदिशति वेदः।

❖ मानसिकी समुन्नतिः : मनो हि मानवानां सर्वविधप्रवृत्तीनां नियन्त्रकम्। धीमन्तो मानवाः मनसः शुभसंकल्पेनानुप्राणिताः सन्तः महत्कर्माणि साधयन्ति, सुसारथिः यथा प्रग्रहणे सुष्ठुतयाश्वानां नियन्त्रणेन सम्यक् तया रथपरिचालनं करोति, तथैव शिवरूपया मनसा नियन्त्रतो मानवोऽपि स्वीयोपयुक्तेषु सर्वेषां हितविधायकेषु शोभनकर्मसु प्रवृत्तो भवति। उक्तञ्च—

'सुषारथिरश्वाननिव यन्मनुष्यान्नेनीयते भीशुभिर्वाजिन इव।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु॥'(१३)

अतो मनसः संकल्पो यदि शान्तो मङ्गलमयः सर्वेषां हितसाधको वा भवति तर्हि मानवेषु मानवतायाः जागरणं सम्भवति। सत्यमिदम् ऋषिणा याज्ञवल्क्येनानुभूतं तस्मादेव सः मनसः संकल्पः यथा शिवः कल्याणकारी मङ्गलमयो वा भवत्विति प्रार्थयति। एतादृशं मनः खलु मानवानामभ्यन्तरे प्रज्ज्वलितायाः मानवतायाः प्रकाशकज्योतिस्वरूपः। अतः सुप्राचीने वैदिककाले ऋषिहृदये मानवतावादो जागरितः आसीदिति दृश्यते।

**उपसंहृतिः** :- उपरिप्रदत्तवर्णनातः ज्ञायते यत्, वेदसंहितासु मानवकल्याणभावना दरीदृश्यते। येन यदुद्देश्येन वेदस्यानुशीलनं क्रियते तेन तत्रावश्यमेव तत् संप्राप्यते। ईदृशं किमपि नास्ति यद्वेदे न विद्यते। मानवकल्याणाय एव वेदानां सृष्टिः। मानवेषु यावत् पर्यन्तं लोकहितभावना नोत्पद्यते तावत् मानवतावादः नोदयति। मानवता नोदयति चेत् हिंसा-द्वेषादिभिः ग्रस्ता भविष्यति इयं धरित्री। फलत्वेन धरित्री निवासायोग्या भूत्वा सर्वत्र विशृङ्खलेव दरीदृश्यते। परिशेषे वक्तुं शक्यते यत्, विभेदपूर्णस्य भोगसर्वस्य वर्तमानसमाजस्यास्य उत्तरणाय सहस्रवर्षपूर्वकथितं मानवतावादस्य मर्मवचनम् अधुनापि प्रासङ्गिकम्। अतो वैदिकसूक्तेषु प्रदर्शिता मानवतायाः धारणा वर्तमानसमाजे शान्तिस्थापनार्थं साम्यानयनार्थञ्च सर्वेषु मानवहृदयेषु जागरणीया।

**सूत्रनिर्देशः** :-


Published by: Amitrakshar Publishers – Amitrakshar International Journal of Interdisciplinary and Transdisciplinary Research (AIJITR)
https://www.amitrakshar.co.in/journal/ ✉ : editor@amitrakshar.co.in DOI (Crossref) Prefix: 10.63431

Amitrakshar International Journal
of Interdisciplinary and Transdisciplinary Research (AIJITR)
(A Social Science, Science and Indian Knowledge Systems Perspective)
Open-Access, Peer-Reviewed, Refereed, Bi-Monthly, International E-Journal

१. ऋग्वेदः :- १/८९/८
२. ऋग्वेदः :- ४/१०/१
३. ऋग्वेदः :- ७/५६/१२
४. शुक्लयजुर्वेदः :- ११/७७
५. ऋग्वेदः :- १/१०/६
६. ऋग्वेदः. १०/१५९/४
७. ऋग्वेदः १/११४/७
८. ऋग्वेदः १/११४/८
९. ऋग्वेदः – १०।११११२
१०. अथर्ववेद: :- ३।३०।२,३
११. ऋग्वेदः – ३/७५/६
१२. ऋग्वेदः :- १०/३४/१३
१३. शुक्लयजुर्वेद: - ६।४।६

**अनुशीलितग्रन्थसूची :-**


- गोस्वामी. विजनविहारी, ऋग्वेदसंहिता(१९३५), हरफ-प्रकाशनी, कलकाता
- दत्त. रमेशचन्द्रः, यजुर्वेद-संहिता(१९७७), हरफ-प्रकाशनी, कलकाता
- शर्मा. आचार्यश्रीरामः, ऋग्वेद-संहिता(२००४), संस्कृति संस्थानम्, बरेली
- सरस्वती. दयानन्दः, ऋग्वेदभाष्यभूमिका(१९६०), वैदिक-मन्त्रालय, अजमेर
- वन्दोपाध्यायः. शान्ति, वैदिकपाठसंकलन(२००४), सदेश, कलकाता
- गोस्वामी. विजनविहारी, ऋग्वेदसंहिता(१९३५), हरफ-प्रकाशनी, कलकाता
- बन्दोपाध्यायः. उदयचन्द्रः, वेद संकलन (२००१), संस्कृत बुक डिपो, कलकाता
- गोपः.युधिष्ठिरः, वैदिक साहित्येर इतिहास, संस्कृत बुक डिपो, कलकाता
- वसु.योगीराजः, वेदेर परिचय (१९९३), फार्मा के एल एम प्राइभेट लिमितेड
- दासः.देवकुमारः, संस्कृत साहित्येर इतिहास (२०१०), सदेश, कलकाता
- विश्वासः. दिधीति, वैदिक पाठसञ्चयन (२०१३), पश्चिमबङ्ग राज्य पुस्तक पर्षद्, कलकाता
- भट्टाचार्यः. भवानीप्रसादः; अधिकारी. तारकनाथः, वैदिक संकलन (२०१७), संस्कृत बुक डिपो, कलकाता